## प्राक्शास्त्री-प्रथमवर्षम् – दर्शनम्

Course- 01 श्रेयोऽङ्कः- 4

**पाठ्यपरिचयः –** भारतीयदर्शनस्य परिचयार्थम् इदं पाठ्यं निर्धारितमस्ति। भारतीयदर्शनस्य आरम्भः कदा जातः? भारतीयदर्शनस्य प्रयोजनं किम्? भारतीयदर्शने कति प्रस्थानानि सन्ति? तेषां प्रस्थानानां के महत्त्वपूर्णाः सिद्धान्ताः सन्ति? एतेषां विविधदार्शनिकप्रस्थानानां कीदृशी आचार्यपरम्परा ग्रन्थपरम्परा वा विद्यते? विविधैः आचार्यैः प्रतिपादितेषु सिद्धान्तेषु कथं कालक्रमेण परिष्काराः सञ्जाताः? इत्येतासां जिज्ञासानां समाधानम् एतस्य पाठ्यविषयस्य अध्ययनेन सम्भविष्यति। वैदिककालादारभ्य अद्यावधि भारतीयदर्शनस्य ज्ञानपरम्परा निरन्तरं परिवर्धमाना विद्यते। एषः पाठ्यविषयः दर्शनस्य ज्ञानपरम्परायाः विकासक्रमं वैशिष्ट्यं च बोधयति।

**अधिगमपरिणामः** – एतस्य पाठ्यस्य अध्ययनेन छात्राः-

- भारतीयदर्शनस्य स्वरूपं प्रयोजनं प्रवृत्तिं च विज्ञापयितुं समर्थाः भविष्यन्ति।
- न्याय-वैशेषिकशास्त्रस्य तर्कप्रणालीं बोधयितुं शक्ष्यन्ति।
- साङ्ख्य-योगयोः समानतन्त्रतां विज्ञाय साङ्ख्य-योगसिद्धान्तानां प्रवचनकौशलं प्राप्स्यन्ति।
- मीमांसाशास्त्रदृष्ट्या वेदवाक्यार्थप्रक्रियां प्रबोधयितुं योग्याः भविष्यन्ति।
- वेदान्तशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति।

**पाठ्यांशः –**

| पाठ्यांशः | विवरणम् |
|---|---|
| **१. भारतीयदर्शनपरिचयः** (चार्वाक-जैन-बौद्धदर्शनानां परिचयः) | (क) दर्शनशब्दस्य व्युत्पत्तिः, दर्शनशास्त्रस्योद्गमः विकासः, भारतीयदर्शनस्य प्रवृत्तयः प्रयोजनं च। विविधदर्शनानां बीजसिद्धान्ताः। दर्शनशास्त्रस्य प्रस्थानानि, भारतीयदर्शनस्य विविधप्रस्थानानां परिचयः, आस्तिकदर्शनानां वैशिष्ट्यम्।<br>(ख) चार्वाकदर्शनस्य परिचयः वैशिष्ट्यं च।<br>(ग) जैनदर्शनस्य परिचयः वैशिष्ट्यं च।<br>(घ) बौद्धदर्शनस्य परिचयः वैशिष्ट्यं च। |
| **२. न्यायवैशेषिकदर्शनपरिचयः** | न्यायदर्शनस्य परिचयः, न्यायदर्शनस्य आचार्यपरम्परा, न्यायदर्शनस्य प्रमाणमीमांसा न्यायदर्शनस्य प्रमुखाः सिद्धान्ताः।<br>वैशेषिकदर्शनस्य परिचयः, वैशेषिकदर्शनस्य आचार्यपरम्परा, वैशेषिकदर्शनस्य प्रमुखाः सिद्धान्ताः, न्यायवैशेषिकदर्शनयोः समानतन्त्रता। |

| | |
|---|---|
| ३. **साङ्ख्ययोगदर्शनपरिचयः** | साङ्ख्यदर्शनम् – साङ्ख्यशब्दस्य व्युत्पत्तिः, साङ्ख्यशास्त्रस्योद्गमः विकासश्च। साङ्ख्यशास्त्रस्य प्रयोजनम्। साङ्ख्यदर्शनस्य आचार्यपरम्परा। साङ्ख्यदर्शनस्य प्रमुखाः सिद्धान्ताः।<br>योगदर्शनस्य परिचयः, योगशब्दस्य व्युत्पत्तिः योगदर्शनस्य आचार्यपरम्परा। समाधियोगः, साधनयोगः, योगदर्शनस्य प्रमुखाः सिद्धान्ताः, साङ्ख्ययोगदर्शनयोः समानतन्त्रता। |
| ४. **मीमांसा-वेदान्तपरिचयः** | मीमांसादर्शनम्– मीमांसाशब्दस्य व्युत्पत्तिः, मीमांसा-शास्त्रस्योद्गमः विकासः प्रयोजनं च। मीमांसाशास्त्रस्य प्रस्थानानि। मीमांसादर्शनस्य आचार्यपरम्परा ग्रन्थपरम्परा च। मीमांसादर्शनस्य प्रमुखाः सिद्धान्ताः।<br>वेदान्तदर्शनम्- वेदान्तशब्दस्य व्युत्पत्तिः, वेदान्तशास्त्रस्योद्गमः विकासः प्रयोजनं च। वेदान्तदर्शनस्य प्रस्थानानि। वेदान्तदर्शनस्य आचार्यपरम्परा ग्रन्थपरम्परा च। वेदान्तदर्शनस्य प्रमुखाः सिद्धान्ताः। |

**प्रायोगिकम्** – अस्मिन् पाठ्ये छात्रैः करणीयाः प्रयोगाः अभ्यासाश्च -

- भारतीयदर्शनस्य कस्यापि एकस्य आचार्यस्य (प्राध्यापकेन सूचितस्य आचार्यविशेषस्य) जीवनं कर्तृत्वं च सरलभाषया प्रभाषणीयम्।
- भारतीयदर्शनस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम्।
- आचार्य-ग्रन्थ-नामस्मरणक्रीडा
- पुस्तकालय-परियोजना – कमप्येकं दार्शनिकसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च।
- प्रस्थानविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना।

**स्वाध्यायसामग्री** –


- दर्शनार्णवः (संक्षेपग्रन्थः)- सेनापतिः सुकान्तकुमारः, केन्द्रीयसंस्कृतविश्वविद्यालयः, २०२५ Darśanārṇava | Anuchanam Bookstore, A Foundation Of Central Sanskrit University
- भारतीय दर्शन - बलदेव उपाध्याय, शारदा मन्दिर, वाराणसी, १९९७
- सर्वदर्शनसङ्ग्रहः - माधवाचार्यः, भण्डारकर्-शोधसंस्थानम्, पूणे, १९२४
- दर्शन दिग्दर्शन - राहुल सांकृत्यायन, किताब महल, इलाहाबाद, २०१७